। इन्धो वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्तं वाऽएतमिन्धꣳ सन्तमिन्द्र इत्याचक्षते परोक्षेणैव परोक्षप्रिया-इव हि देवाः प्रत्यक्षद्विषः ॥२॥ अथैतद्वामेऽक्षिणि पुरुषरूपम् । एषास्य पत्नी विराट् तयोरेष सꣳस्तावो य एषोऽन्तर्हृदयऽआकाशोऽथैनयोरेतदन्नं य एषोऽन्तर्हृदये लोहितपिण्डोऽथैनयोरेतत्प्रावरणं यदेतदन्तर्हृदये जालकमिवाथैनयोरेषा सृतिः सती संचरणी येषा हृदयादूर्ध्वा नाड्युच्चरति ॥३॥ ता वाऽअस्यैताः । हिता नाम नाड्यो यथा केशः सहस्रधा भिन्न एताभिर्वाऽएतमास्रवदास्रवति तस्मादेष प्रविविक्ताहारतर-इव भवत्यस्माच्छारीरादात्मनः ॥४॥ तस्य वाऽएतस्य पुरुषस्य । प्राची दिक्प्राञ्चः प्राणा दक्षिणा दिग्दक्षिणाः प्राणाः प्रतीची दिक्प्रत्यञ्चः प्राणा उदीची दिगुदञ्चः प्राणा ऊर्ध्वा दिगूर्ध्वाः प्राणा अवाची दिगवाञ्चः प्राणा सर्वा दिशः सर्वे प्राणाः ॥५॥ स एष नेति नेत्यात्मा । अगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गोऽसितो न सज्यते न व्यथतेऽभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः स होवाच जनको वैदेहो नमस्ते याज्ञवल्क्याभयं त्वागच्छताद्यो नो भगवन्नभयं वेदयसऽइमे विदेहा अयमहमस्मीति ॥६॥ ब्राह्मणम् ॥१ [६. ११.] ॥ पञ्चमः प्रपाठकः ॥ कण्डिकासंख्या१०७ ॥ षष्ठोऽध्यायः [१७.] ॥ ॥

जनकꣳ ह वैदेहं याज्ञवल्क्यो जगाम । समेनेन वदिष्यऽइत्यथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदतुस्तस्मै ह याज्ञवल्क्यो वरं ददौ स ह कामप्रश्नमेव वव्रे तꣳ हास्मै ददौ तꣳ ह सम्राडेव पूर्वः पप्रच्छ ॥१॥ याज्ञवल्क्य किंज्योतिरयं पुरुष इति । आदित्यज्योतिः सम्राडिति होवाचादित्येनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीत्येवमेवैतद्याज्ञवल्क्य ॥२॥ अस्तमितऽआदित्ये याज्ञवल्क्य । किंज्योतिरेवायं पुरुष इति चन्द्रज्योतिः सम्राडिति होवाच चन्द्रेणैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीत्येवमेवैतद्याज्ञवल्क्य

॥३॥ अस्तमितऽआदित्ये याज्ञवल्क्य । चन्द्रमस्यस्तमिते किंज्योतिरेवायं पुरुष इत्यग्निर्ज्योतिः सम्राडिति होवाचाग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीत्येवमेवैतद्याज्ञवल्क्य ॥४॥ अस्तमितऽआदित्ये याज्ञवल्क्य । चन्द्रमस्यस्तमिते शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति वाग्ज्योतिः सम्राडिति होवाच वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीति तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य ॥५॥ अस्तमितऽआदित्ये याज्ञवल्क्य । चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किंज्योतिरेवायं पुरुष इत्यात्मज्योतिः सम्राडिति होवाचात्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीति ॥६॥ ॥ शतम् ७४०० ॥ ॥ कतम आत्मेति । योऽयं विज्ञानमयः पुरुषः प्राणेषु हृद्यन्तर्ज्योतिः स समानः सन्नुभौ लोकौ संचरति ध्यायतीव लेलायतीव सधीः स्वप्नो भूत्वेमं लोकमतिक्रामति ॥७॥ स वाऽअयं पुरुषो जायमानः । शरीरमभिसम्पद्यमानः पाप्मभिः सꣳसृज्यते स उत्क्रामन्म्रियमाणः पाप्मनो विजहाति मृत्यो रूपाणि ॥८॥ तस्य वाऽएतस्य पुरुषस्य । द्वेऽएव स्थाने भवत इदं च परलोकस्थानं च संध्यं तृतीयꣳ स्वप्नस्थानं तस्मिन्त्संध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यतीदं च परलोकस्थानं च ॥९॥ अथ यथाक्रमोऽयं परलोकस्थाने भवति । तमाक्रममाक्रम्योभयान्पाप्मन आनन्दांश्च पश्यति स यत्रायं प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिर्भवति ॥१०॥ न तत्र रथा न रथयोगा न पन्थानो भवन्ति । अथ रथान्रथयोगान्पथः सृजते न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान्मुदः प्रमुदः सृजते न तत्र वेशान्ताः स्रवन्त्यः पुष्करिण्यो भवन्त्यथ वेशान्ताः स्रवन्तीः पुष्करिणीः सृजते स हि कर्ता ॥११॥ तदप्येते श्लोकाः । स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति । शुक्रमा-

द्राय पुनरेति स्थानꣳ हिरण्मयः पौरुष एकहꣳसः ॥१२॥ प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतश्चरित्वा । स ईयतेऽअमृतो यत्रकामꣳ हिरण्मयः पौरुष एकहꣳसः ॥१३॥ स्वप्नान्तऽउच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि । उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् ॥१४॥ आराममस्य पश्यन्ति । न तं कश्चन पश्यतीति तं नायतं बोधयेदित्याहुर्दुर्भिषज्यꣳ हास्मै भवति यमेष न प्रतिपद्यते ॥१५॥ अथो खल्वाहुः । जागरितदेश एवास्यैष यानि ह्येव जाग्रत्पश्यति तानि सुप्त इत्यत्रायं पुरुषः स्वयंज्योतिर्भवतीत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१६॥ स वाऽएष एतस्मिन्त्स्वप्नान्ते । रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव स यदत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१७॥ तद्यथा महामत्स्यः । उभे कूलेऽअनुसंचरति पूर्वं चापरं चैवमेवायं पुरुष एताऽउभावन्तावनुसंचरति स्वप्नान्तं च बुद्धान्तं च ॥१८॥ तद्यथास्मिन्नाकाशे । श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः सꣳहत्य पक्षौ सल्लयायैव ध्रियतऽएवमेवायं पुरुष एतस्माऽअन्ताय धावति यत्र सुप्तो न कं चन कामं कामयते न कं चन स्वप्नं पश्यति ॥१९॥ ता वाऽअस्यैता । हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्तमिव पतति यदेव जाग्रद्भयं पश्यति तदत्राविद्यया भयं मन्यतेऽथ यत्र राजेव देव-इवाहमेवेदꣳ सर्वमस्मीति मन्यते सोऽस्य परमो लोकोऽथ यत्र सुप्तो न कं चन कामं कामयते न कं चन स्वप्नं पश्यति ॥२०॥ तद्वाऽअस्यैतत् । आप्तकाममात्मकाममकामꣳ रूपं तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किं चन

वेद नान्तरमेवमेवायꣳ शारीर आत्मा प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किं चन वेद नान्तरम् ॥२१॥ तद्वा अस्यैतत् । अतिच्छन्दोऽपहतपाप्माभयꣳ रूपमशोकान्तरमत्र पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदा यज्ञा अयज्ञा अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा पौल्कसोऽपौल्कसश्चाण्डालोऽचाण्डालः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतः पुण्येनान्वागतः पापेन तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति ॥२२॥ यद्वै तन्न पश्यति । पश्यन्वै तद्द्रष्टव्यं न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् ॥२३॥ यद्वै तन्न जिघ्रति । जिघ्रन्वै तद्घ्रातव्यं न जिघ्रति न हि घ्रातुर्घ्राणाद्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत् ॥२४॥ यद्वै तन्न रसयति । विजानन्वै तद्रसं न रसयति न हि रसयितू रसाद्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत् ॥२५॥ यद्वै तन्न वदति । वदन्वै तद्वक्तव्यं न वदति न हि वक्तुर्वचो विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत् ॥२६॥ यद्वै तन्न शृणोति । शृण्वन्वै तच्छ्रोतव्यं न शृणोति न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात् ॥२७॥ यद्वै तन्न मनुते । मन्वानो वै तन्मन्तव्यं न मनुते न हि मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत ॥२८॥ यद्वै तन्न स्पृशति । स्पृशन्वै तत्स्प्रष्टव्यं न स्पृशति न हि स्प्रष्टु स्पृष्टेर्विपरिलोपोऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्स्पृशेत् ॥२९॥ यद्वै तन्न विजानाति । विजानन्वै तद्विज्ञेयं न विजानाति न हि विज्ञातुर्विज्ञानाद्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् ॥३०॥ सलिल एको द्रष्टाद्वैतो भवति । एष ब्रह्म-

लोकः सम्राडिति हैनमुवाचैषास्य परमा सम्पदेषोऽस्य परमो लोक एषोऽस्य
परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥३१॥ स यो
मनुष्याणाꣳ राद्धः समृद्धो भवति । अन्येषामधिपतिः सर्वैर्मानुष्यकैः कामैः सम्पन्न-
तमः स मनुष्याणां परम आनन्दः ॥३२॥ अथ ये शतं मनुष्याणामानन्दाः । स
एकः पितॄणां जितलोकानामानन्दः ॥३३॥ अथ ये शतं पितॄणां जितलोकाना-
मानन्दाः । स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते ॥३४॥
अथ ये शतं कर्मदेवानामानन्दाः । स एक आजानदेवानामानन्दो यश्च श्रोत्रियो
ऽवृजिनोऽकामहतः ॥३५॥ अथ ये शतमाजानदेवानामानन्दाः । स एको देव-
लोकऽआनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः ॥३६॥ अथ ये शतं देवलोक
ऽआनन्दाः । स एको गन्धर्वलोकऽआनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः
॥३७॥ अथ ये शतं गन्धर्वलोकऽआनन्दाः । स एकः प्रजापतिलोकऽआनन्दो
यश्च श्रोत्रियोऽवृजिनोऽकामहतः ॥३८॥ अथ ये शतं प्रजापतिलोकऽआनन्दाः ।
स एको ब्रह्मलोकऽआनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहत एष ब्रह्मलोकः
सम्राडिति हैनमनुशशासैतदमृतꣳ सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षा-
यैव ब्रूहीति ॥३९॥ स वाऽएष एतस्मिन्त्सम्प्रसादे । रत्वा चरित्वा दृष्ट्वैव पुण्यं
च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव स यदत्र किंचित्पश्यत्य-
नन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते
सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥४०॥ अत्र ह याज्ञवल्क्यो बिभयां
चकार । मेधावी राजा सर्वेभ्यो मान्तेभ्य उदरौत्सीदिति स यत्राणिमानं न्येति ज-
रया वोपतपता वाणिमानं निगच्छति यथाम्रं वोदुम्बरं वा पिप्पलं वा बन्ध-
नात्प्रमुच्येतैवमेवायꣳ शारीर आत्मेभ्योऽङ्गेभ्यः सम्प्रमुच्य पुनः प्रतिन्यायं प्रतियो-
न्याद्रवति प्राणायैव ॥४१॥ तद्यथानः सुसमाहितम् । उत्सर्जद्यायादेवमेवायꣳ

शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन्याति ॥४२॥ तद्यथा राजानमायन्तम् । उग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्तेऽयमायात्ययमागच्छतीत्येवꣳ हैवंविदꣳ सर्वाणि भूतानि प्रतिकल्पन्तऽइदं ब्रह्मायातीदमागच्छतीति ॥४३॥ तद्यथा राजानं प्रयियासन्तम् । उग्राः प्रत्येनसः सूतग्रामण्य उपसमायन्त्येवꣳ हैवंविदꣳ सर्वे प्राणा उपसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥४४॥ ब्राह्मणम् ॥१ [७. १.] ॥ ॥

स यत्रायꣳ शारीर आत्माबल्यं नीत्य । संमोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति ॥१॥ स यत्रैष चाक्षुषः । पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवत्येकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयतीत्याहुरेकीभवति न वदतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुतऽइत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुः ॥२॥ तस्य हैतस्य । हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तꣳ सर्वे प्राणा अनूत्क्रामन्ति संज्ञानमेवान्ववक्रामति स एष ज्ञः सविज्ञानो भवति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ॥३॥ तद्यथा तृणजलायुका । तृणस्यान्तं गत्वात्मानमुपसꣳहरत्येवमेवायं पुरुष इदꣳ शरीरं निहत्याविद्यां गमयित्वात्मानमुपसꣳहरति ॥४॥ तद्यथा पेशस्कारी । पेशसो मात्रामपादायान्यन्नवतरं कल्याणतरꣳ रूपं तनुतऽएवमेवायं पुरुष इदꣳ शरीरं निहत्याविद्यां गमयित्वान्यन्नवतरꣳ रूपं तनुते पित्र्यं वा गान्धर्वं वा ब्राह्मं वा प्राजापत्यं वा दैवं वा मानुषं वान्येभ्यो वा भूतेभ्यः ॥५॥ स वाऽअयमात्मा । ब्रह्म विज्ञानमयो मनोमयो वाङ्मयः प्राणमयश्चक्षुर्मयः श्रोत्रमय आकाशमयो वायुमयस्तेजोमय आपोमयः पृथिवीमयः क्रोधम-

योऽक्रोधमयो हर्षमयोऽहर्षमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदंमयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति ॥६॥ अथो खल्वाहुः । काममय एवायं पुरुष इति स यथाकामो भवति तथाक्रतुर्भवति यथाक्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यतऽइति ॥७॥ तदेष श्लोको भवति । तदेव सक्तस्सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य । प्राप्यान्तं कर्मणस्तस्य यत्किं चेह करोत्ययम् । तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मणऽइति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम आत्मकाम आप्तकामो भवति न तस्मात्प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन्ब्रह्माप्येति ॥८॥ तदेष श्लोको भवति । यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुतऽइति ॥९॥ तद्यथाहिनिर्ल्वयनी । वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदꣳ शरीरꣳ शेतेऽथायमनस्थिकोऽशरीरः प्राज्ञ आत्मा ब्रह्मैव लोक एव सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः ॥१०॥ तदप्येते श्लोकाः । अणुः पन्था विततः पुराणो माꣳस्पृष्टोऽनुवित्तो मयैव । तेन धीरा अपियन्ति ब्रह्मविद उत्क्रम्य स्वर्गं लोकमितो विमुक्ताः ॥११॥ तस्मिञ्छुक्लमुत नीलमाहुः पिङ्गलꣳ हरितं लोहितं च । एष पन्था ब्रह्मणा हानुवित्तस्तेनैति ब्रह्मवित्तैजसः पुण्यकृच्च ॥१२॥ अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते । ततो भूय-इव ते तमो यऽउ सम्भूत्याꣳ रताः ॥१३॥ असुर्या नाम ते लोकाः । अन्धेन तमसावृताः । तांस्ते प्रेत्यापिगच्छन्त्यविद्वाꣳसोऽबुधा जनाः ॥१४॥ तदेव सन्तस्तदु तद्ववामो न चेदवेदी महती विनष्टिः । ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्ति ॥१५॥ आत्मानं चेद्विजानीयादयमस्मीति पुरुषः । किमिच्छन्कस्य कामाय शरीरमनु संचरेत् ॥१६॥ यस्यानुवित्तः प्रतिबुद्ध

आत्मास्मिन्त्संदेहे गहने प्रविष्टः । स विश्वकृत्स हि सर्वस्य कर्ता तस्य लोकः
स उ लोक एव ॥१७॥ यदैतमनुपश्यति । आत्मानं देवमञ्जसा ईशानं भूत-
भव्यस्य न तदा विचिकित्सति ॥१८॥ यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः
। तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् ॥१९॥ यस्मादर्वाक्संवत्सरोऽहो-
भिः परिवर्तते । तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥२०॥ प्राणस्य
प्राणम् । उत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः । ते
निचिक्युर्ब्रह्म पुराणमग्र्यं मनसैवाप्तव्यं नेह नानास्ति किं चन ॥२१॥ मृत्योः स
मृत्युमाप्नोति य इह नानेव पश्यति । मनसैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् ॥२२॥
विरजः पर आकाशात् । अज आत्मा महा ध्रुवः । तमेव धीरो विज्ञाय प्रज्ञां
कुर्वीत ब्राह्मणः । नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनꣳ हि तदिति ॥२३॥
स वाऽअयमात्मा । सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति
यदिदं किं च स न साधुना कर्मणा भूयान्नोऽएवासाधुना कनीयानेष भूताधिप-
तिरेष लोकेश्वर एष लोकपालः स सेतुर्विधरण एषां लोकानामसम्भेदाय ॥२४॥
तमेतं वेदानुवचनेन विविदिषन्ति । ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन
चैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति ॥२५॥ ए-
तद्ध स्म वै तत्पूर्वे ब्राह्मणाः । अनूचाना विद्वाꣳसः प्रजां न कामयन्ते किं प्रज-
या करिष्यामो येषां नोऽयमात्मायं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैष-
णायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तै-
षणा या वित्तैषणा सा लोकैषणोभे ह्येतेऽएषणे एव भवतः ॥२६॥ स एष
नेति नेत्यात्मा । अगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गोऽसितो न
सज्यते न व्यथतऽइत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युभेऽउभे ह्येष
एते तरत्यमृतः साध्वसाधुनी नैनं कृताकृते तपतो नास्य केन चन कर्मणा लोको

मीयते ॥२७॥ तदेतदृचाभ्युक्तम् । एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् । तस्यैव स्यात्पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेनेति तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत्सर्वमेनं पश्यति सर्वोऽस्यात्मा भवति सर्वस्यात्मा भवति सर्वं पाप्मानं तरति नैनं पाप्मा तरति सर्वं पाप्मानं तपति नैनं पाप्मा तपति विपापो विजरो विजिघत्सोऽपिपासो ब्राह्मणो भवति य एवं वेद ॥२८॥ स वा एष महानज आत्मा । अन्नादो वसुदानः स यो हैवमेतं महान्तमजमात्मानमन्नादं वसुदानं वेद विन्दते वसु ॥२९॥ स वा एष महानज आत्मा । अजरोऽमरोऽभयोऽमृतो ब्रह्माभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः सोऽहं भगवते विदेहान्ददामि मां चापि सह दास्यायेति ॥३०॥ स वा एष महानज आत्मा । अजरोऽमरोऽभयोऽमृतो ब्रह्माभयं वै ब्रह्माभयꣳ हि वै ब्रह्म भवति य एवं वेद ॥३१॥ ब्राह्मणम् ॥२ [८. २.] ॥ ॥

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः । मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव कात्यायनी सोऽन्यद्वृत्तमुपाकरिष्यमाणः ॥१॥ याज्ञवल्क्यो मैत्रेयीति होवाच । प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्यान्तं करवाणीति ॥२॥ सा होवाच मैत्रेयी । यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्स्यां न्वहं तेनामृताहो३ नेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितꣳ स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥३॥ सा होवाच मैत्रेयी । येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥४॥ स होवाच याज्ञवल्क्यः । प्रिया खलु नो भवती सती प्रियमवृतद्धन्त खलु भवति तेऽहं तद्वक्ष्यामि व्याख्यास्यामि ते वाचं तु मे व्याचक्षाणस्य निदिध्यासस्वेति ब्रवीतु भग-